# धात्वाख्यातार्थनिर्णयः

**Dr. G. S.V. Dattatreya Murthy**
Assistant Professor
Department of Sanskrit & IC
SCSVMV (Deemed to be university)
Enathur, Kanchipuram - 631561

**प्रधानांशाः**

- **भाट्टेषु मण्डनमतम्**
- **भावनामुख्यविशेष्यकशाब्दबोधः**
- **प्राभाकरमतम्**
- **नैयायिकमतम्**
- **आख्यातार्थः**
- **कर्तृकर्मणोराख्यातार्थत्वनिरासः**
- **प्रथमान्तार्थमुख्यविशेष्यकः शाब्दबोधः**
- **शाब्दबोधः**
- **मीमांसकमतरीत्या शाब्दबोधः**
- **शाब्दिकमतरीत्या शाब्दबोधः**

वैयाकरणसिद्धान्तरीत्या वाक्यस्फोटस्यैव मुख्यत्वात् तस्य च प्रायशः सुप्तिङन्तचयरूपत्वात् सुबन्तानां च प्रायशः क्रियाविशेषणत्वात् धातोः क्रियावाचित्वेन पुरस्फूर्तिकत्वात् प्रथमं धात्वर्थनिरूपणमारभ्यते। किञ्च सर्वेषां शब्दानां धातुमूलकत्वस्य **सर्वं नाम धातुजमाह शकटस्य च तोकम्** इत्यादिना भाष्यकृता प्रपञ्चितत्वात् **यत्रोभे भावप्रधाने भवतः** इति निरुक्तेन वाक्ये धात्वर्थप्राधान्यस्यैवोक्तत्वाच्च धात्वर्थनिरूपणस्यैव प्राथम्यं युज्यते। तस्मिन् धात्वर्थे विशेषणतयान्वययोग्यस्य तिङर्थस्यापि निरुपणं धात्वर्थनिरूपणोपकारकमिति धात्वर्थनिरूपणेनैवाख्यातार्थस्यापि विवरणमत्र कृतम्। धात्वाख्यातार्थविषये नास्त्यैकमत्यं शास्त्रकाराणाम्। अत्र मीमांसकनैयायिकयोः मतप्रदर्शनपूर्वकं वैयाकरणमतं प्रदर्श्यते। मीमांसकेषु मण्डनमिश्र एव प्रथमं पृथक्तया धात्वाख्यातार्थविषये विवेचनमकरोत्। तेन भावनाविवेकग्रन्थग्रन्थे मीमांसकमतं सम्यक् प्रकाशितम्। तत्स्थमेव तन्मतमत्र सङ्क्षिप्यते।

## भाट्टेषु मण्डनमतम्

फलमेव धात्वर्थः। भावना प्रत्ययार्थः। तथाहि –**पूर्वापरीभूतं भावमाख्यातमाचष्टे व्रजतिपचतीत्युपक्रमप्रभृत्यपवर्गपर्यन्तम्** इति निरुक्तात् आख्यातस्य फलोत्पादिका क्रियार्थ

इत्यवगम्यते। भावपदस्य भूधातोः णिजन्ताद्भावे घञि निष्पन्नत्वेन भवनानुकूलव्यापारपरत्वात्। सैव भावनेति क्रियेति च व्यवह्रियते। पचतीत्याद्याख्यातस्य (तिङन्तस्य) पाकं करोतीति विवरणात् भावनाभिन्नफलस्यापि तिङन्तवाच्यता निश्चीयते। तच्च फलं धात्वर्थः। नाप्युभयं धात्वर्थः। अन्यायोऽनेकार्थत्वमिति न्यायात्। किञ्च यथा घटं करोतीत्यत्र जननोत्पादश्रुतिविषयां भावनां करोतिर्बोधयति तथैव पाकं करोतीत्यत्रापि। अन्यथा अनेकार्थत्वात् अभिधेयनिश्चयायोगात् व्यवहाराङ्गतैव न स्यात्। क्लृप्तसामर्थ्यानुसारेण प्रयोगोपपत्तेः क्लृप्तार्थत्यागे अन्यार्थकल्पने च प्रमाणाभावात्, किं करोतीति प्रश्ने करोतेरुत्पादनार्थकत्वस्यैव सर्वसम्मतत्वाच्च। एवञ्च पचतीत्यस्य पाकं करोतीति विवरणात् तिङः करोत्यर्थता सिद्धा।

**उदासीनत्वविच्छेदलक्ष्यं धात्वर्थकारणम्।**

**स्पन्दव्यापारपर्यायं करोत्यर्थं प्रचक्षते।।**

इति आधिश्रयतीत्यादिषु अधिश्रयणादिसंयोगभेदेभ्योऽव्यापारात्म-केभ्यो भेदेन करोति, स्पन्दते, चेष्टते, व्याप्रियते इति पदबोध्यव्यापारः करोत्यर्थः। नहि चलित्वा स्थितस्य क्रियाप्रभवपूर्वोत्तरदेशसंयोगविभागः भावः। अतस्तदालम्बनो व्यापारप्रत्ययो न जातु विरमेत् इति।

यद्यपि **न केवला प्रकृतिः प्रयोक्तव्या नापि केवलः प्रत्यय** इति नियमेन पार्थक्येन प्रकृतिनैरपेक्ष्येण प्रत्ययस्य नार्थबोधकत्वम्, अथापि **प्रकृतिप्रत्यययार्थयोः प्रत्ययार्थः प्रधानम्** इति न्यायेन पदार्थे यः प्रधानभूतः प्रकृत्यर्थभिन्नतया च भासमानः स एव प्रत्ययार्थ इत्यनुमातुं शक्यम्। **तदागमे हि दृश्यते** इति न्यायाच्च। एतच्च आख्यातार्थाधिकरणे तन्त्रवार्त्तिके भट्टपादैस्स्पष्टीकृतम्। यदि च भावना धात्वर्थोऽभविष्यत् तर्हि भावकृदन्तानां तिङ्न्तानां च बोधे वैलक्षण्यमेव नाभविष्यत्। पचतीत्यस्य यथा पाकं करोतीति विवरणं दृश्यते न तथा पाक इत्यस्य। **धात्वर्थः केवलः शुद्धो भाव इत्यभिधीयते** इति भावनासंस्पर्शरहितस्य धात्वर्थफलस्यैव भावघञन्ते भानम्।

**भावनामुख्यविशेष्यकशाब्दबोधः**

यतस्तण्डुलमित्यादिद्वितीयाद्यन्तपदानां क्रियापदं विना निराकाङ्क्षबोधजनकत्वं नास्त्यतो ज्ञायते क्रियापदं द्वितीयान्तादिपदार्थस्य विशेष्यसमर्पकमिति। द्वितीयाद्यर्थश्च प्रातिपदिकार्थस्य विशेष्यः **प्रकृतिप्रत्ययौ सहार्थं ब्रूतस्तयोः प्रत्ययार्थः प्रधानमि** ति व्युत्पत्तेः। तिङ्न्तघटकधात्वर्थस्य आख्यातार्थ एव विशेष्यः प्रकृतिप्रत्ययार्थयोरिति न्यायादेव। आख्यातस्य कालः सङ्ख्या व्यापारः भावना च अर्थाः। तेष्वपि भावनैव विशेष्यभूता। **भावप्रधानमाख्यातम्** इति निरुक्तस्मृतेः। अतश्च वाक्यजन्यबोधे भावनैव मुख्यविशेष्यतया भासते। **तद्भूतानां क्रियार्थेन समाम्नायः** इति सूत्रयन् जैमिनिरपि क्रियापदबोध्य-भावनामुख्यविशेष्यकं बोधं प्रमाणयति।

धात्वर्थस्य कारकत्वादपि भावनायामन्वयो युक्तः। द्वितीयाद्यर्थकारकाणामपि न धात्वर्थेऽन्वयः। कारकस्य कारकेण निराकाङ्क्षत्वात्। किन्तु आख्यातार्थभावनायामेव।

**प्राभाकरमतम्**

**व्यापारस्य न धात्वाख्यातार्थत्वम्, लिङतिरिक्तलकारस्य न भावनावाचकत्वम्**

कार्याभिधायिलिङादीनामेव कार्यविशेषणीभूतकृतिरूपभावना वाच्या। तदतिरिक्तस्याख्यातस्य न भावना वाच्या। फलमात्रं धात्वर्थः। प्रकृत्यर्थफलेनाक्षेपेण संसर्गमर्यादया वा व्यापाररूपभावनायाः भानम्। आख्यातार्थस्तु कालः सङ्ख्या च। यच्च प्रतिपाद्यते पचति = पाकं करोतीति विवरणेन करोतिसामानाधिकरण्यात् सर्वाख्यातानां भावनावचनता सिध्यतीति तन्न युक्तम्। यद्यपि करोतिः प्रयत्नपरस्तथाप्यत्र किं करोतीति प्रश्नस्य यत्करोति तत्किमिति करोत्यर्थविषयता यदि स्यात् तर्हि पचतीत्युत्तरस्य पाकं करोतीत्यर्थता। न चैवं लोकविवक्षा। किन्तु अनवगते व्यापारविशेषे तद्विशेषावगमाय प्रश्नः क्रियते। तत्र चोत्तरभूतेन पचतीत्यनेन व्यापारविशेष एवाभिधीयत इति युक्तम्। सर्वेऽपि प्रश्नः प्रतिवचनञ्च सामान्यतो ज्ञाते विशेषतोऽज्ञाते। अत्र च धात्वर्थगोचरे एव ज्ञानाज्ञाने। अतश्चात्र करोतेः कस्यचिद्भूतस्य भवनेऽनुकूलस्वभावोऽर्थः। सर्वेऽपि धात्वर्थास्तादृशा इति करोतिना प्रष्टुं निर्देष्टुं च शक्यन्ते। किञ्च किं करोति पचतीत्यादिप्रश्नोत्तरे सप्रयत्नक्रियेषु घटेताम्। अप्रयत्नक्रियेषु किं करोति? रथो गच्छतीत्यादिषु कथम्? सप्रयत्नेष्वपि आस्ते, शेते इत्यादिषु कथन्तराम्? करोतेर्व्यापारमात्रविषयत्वेऽभ्युपगते तु सर्वत्रोपपत्तिर्भवति। अतश्च नाख्यातानां करोत्यर्थता। न च पचतीत्यस्य पाकं करोतीति विवरणं दृश्यते। तत्र प्रकृत्यर्थादपि स्फुटत्वात् प्रधानत्वाच्च प्रत्ययार्थस्यैव विवरणं करोतिना क्रियत इति आख्यातस्य करोत्यर्थतेति वाच्यम्। तत्रापि धात्वर्थाक्षिप्तकर्तृगतं पचत्यर्थानुकूलमार्थं प्रयत्नमुपादाय विवरणोपपत्तेः।

तदुक्तं प्रकरणपञ्चिकायां वाक्यार्थमातृकायाः द्वितीयपरिच्छेदे शालिकानाथेन – **वृद्धव्यवहाराच्छब्दार्थनिर्णयः। न चाख्यातानां भावनावचनत्वमन्तरेण कस्यचिद्वृद्ध-व्यवहारस्यानुपपत्तिः। प्रश्नोत्तरे तु सम्बन्धज्ञानोत्तरकालभाविनी। अतो न तद्वशेन सम्बन्धनिरूपणा। कर्त्रादिसंख्यामात्रवाचितयाख्यातप्रयोगोपपत्तौ नाधिकं शक्यं कल्पयितुम्। पाकं करोति देवदत्त इत्यत्र तावत् पच्यर्थं पाकशब्दो ब्रवीति तदनुगुणं प्रयत्नं करोतिराचष्टे, आख्यातं तु केवलकर्तृसंख्यां वक्तीति सिद्धं तावत्तन्मात्रवाचित्वम्। अतोऽन्यत्रापि तत्रैव वर्तत इति** युक्तम्। एवं **पचति देवदत्तः** इत्यस्य यद्विवरणं **पाकं करोति** इति न तदप्यनुपपन्नम्। पचतीत्यत्र यः पुरुषप्रयत्नः यत्सम्बन्धेन पच्यर्थसाध्यभूतस्तं करोतिना प्रकृतभूतेनोपादाय विवरणोपपत्तेः। यत्रापि प्रयोगो **रथो गमनं करोति** इति तत्रापि प्रयत्नस्यापरस्याभावात् गमनस्य साध्यतां दर्शयितुं गौणः करोतिप्रयोगो द्रष्टव्यः। यस्तु ओदन पचतीत्यादौ वृद्धव्यवहारे एव प्रकृत्यर्थातिरिक्ते प्रयत्ने प्रयोगादाख्यातानां तदर्थमाह स इत्थं

शिक्षयितव्यः। **वत्स! किं न वेत्सि ? अनन्यलभ्यः शब्दार्थ इति। इह च प्रकृत्यर्थाक्षेपेणापि तत्संभवात् न शक्यते तद्वाचकताख्यातानामाश्रयितुम्** इति।

**नैयायिकमतम्**

नैयायिकास्त्वित्थं वदन्ति। ओदनं पचतीत्यत्र ओदननिष्ठविक्लित्तिजनकव्यापारविशेषकर्तृत्वं प्रतीयते। तत्र विक्लित्तिः तदनुकूलव्यापारश्च कस्यार्थ इति चेदुच्यते। विक्लित्तिः फलं तद्द्वितीयाया अर्थः। तदनुकूलो विलक्षणव्यापारो धत्वर्थः।अनुकूलत्वं संसर्गः। फलानुकूलत्वोपलक्षितः विलक्षणव्यापारो धात्वर्थः। न तु फलानुकूलत्वमपि। गौरवात्। फलविशेषान्वयबोधे च धातुविशेषजन्यव्यापारोपस्थिते-र्हेतुत्वमिति ग्रामं त्यजतीत्यादौ धात्वर्थस्पन्दे ग्रामनिष्ठसंयोगजनकत्वमेव प्रतीयते न तु तद्विपरीतम्। धातोः केवलव्यापारवाचकत्वेऽपि ग्रामं गच्छतीतिवत् ग्रामं त्यजतीत्यादौ धात्वर्थस्पन्दे ग्रामनिष्ठसंयोगजनकत्वमेव प्रतीयते न तु तद्विपरीतम्। धातोः केवलव्यापारवाचकत्वेऽपि ग्रामं गच्छतीतिवत् ग्रामं स्पन्दते इति न प्रयोगः। द्वितीयादेः गम्याद्युपस्थापितस्पन्दादावेव फलान्वयबोधकत्वकल्पनात्। न हि येन केनचिदुपस्थापितयोरेवार्थयोः परस्परमन्वयः प्रतीयते तथासति घटकर्मत्वादि-पदोपस्थापितयोरपि घटकर्मत्वाद्योः परस्परमन्वयबोधप्रसङ्गात्। कृञादिसमानार्थकयत-धातूपस्थाप्ये फले विषयितात्मकद्वितीयार्थान्वयसंभवेन घटं करोतीतिवत् घटं यतते इति प्रयोगप्रसङ्गात्। अतः ययोः यादृशान्वयबोधे आकाङ्क्षा तदुपस्थापितयोरेव तादृशान्वयबोधः। आकाङ्क्षा च द्वितीयादेः गम्यादिनैव कल्प्यते न तु तत्समानार्थकस्पन्दादिना। एवं धातोः व्यापारमात्रवाचित्वेऽपि न **त्यजति गच्छति, त्यागो गमनमि** त्यादितोऽविलक्षणबोधप्रसङ्गः। कर्मप्रत्ययसमभिव्याहृतत्यागगमनादिपदस्य तत्फलावच्छिन्नव्यापारे अनादितात्पर्य-कल्पनात्। अनादितात्पर्यमेव हि स्वारसिकप्रयोगनियामकम्। एवञ्च त्यजिगमिप्रभृतिसमभि-व्याहृतकर्मप्रत्ययस्य विभागसंयोगादिफलविशेष एव नियतं तादृशं तात्पर्यमिति न विभागादितात्पर्येण ग्रामं गच्छतीत्यादिप्रयोगः। सकर्मकत्वमपि न फलावच्छिन्नक्रिया-वाचित्वप्रयुक्तम्। ज्ञाप्रभृतावव्याप्तत्वात्। स्मृत्यर्थधातूनां कर्मणि षष्ठ्या इव द्वितीयाया अपि साधुत्वात्। किन्तु द्वितीयासाकाङ्क्षतुमुन्नन्तवृत्त्यानुपूर्वीमद्धातुत्वं सकर्मकत्वमिति प्राचिनाः।

नव्यास्तु फलावच्छिन्नव्यापारो धात्वर्थः। फले द्वितीयादेः शक्त्यन्तरकल्पनापेक्षया धातोर्विशिष्टशक्तिकल्पन एव लाघवम्। द्वितीयार्थस्तु आश्रयत्वमाधेयत्वं वा। ग्राममध्यास्ते, ग्राममधिशेते इत्यादौ द्वितीयाया प्राचीनमतेऽपि आधेयत्वबोधकत्वमावश्यकमिति नाधेयत्वे द्वितीयाया प्राचीनमतेऽपि आधेयत्वबोधकत्वमावश्यकमिति नाधेयत्वे द्वितीयायाः पृथक्शक्तिकल्पनागौरवम्। न च द्वितीयार्थस्याधेयत्वे **कर्मणिद्वितीये** त्याद्यनुशासनविरोध इति वाच्यम्। तस्य कर्मणि फलनिष्ठाधेयत्वान्वयिनि प्रकृतितात्पर्ये तदुत्तरं द्वितीयेत्यर्थात्। यदि च प्राचीनैर्ग्राममध्यास्ते इत्यादिषु

द्वितीयाया आधेयत्वे लक्षणाङ्गीक्रियते तर्हि पक्षेऽस्मिन्नप्यस्त्वाधेयत्वे लक्षणा। शक्तिस्तु द्वितीयायाः सङ्ख्यायामेव भवति। एवञ्च न त्यजिगम्योः पर्यायतापत्तिः। अकर्मकधातूनां तु केवलव्यापारमात्रवाचित्वमेव। न च फलस्य पदार्थैकदेशतया तत्र द्वितीयार्थवृत्तेरन्वयासंभव इति वाच्यम्। व्युत्पत्तिवैचित्र्येण प्रकृते एकदेशान्वयस्वीकारात्। कर्माख्यातस्य तु फलमर्थः। अन्यथा ग्रामो गम्यते इत्यादौ ग्रामादेर्व्यापारजन्यफलाश्रयत्वरूपकर्मत्वप्रतीत्यनुपपत्तेरिति वदन्ति।

**आख्यातार्थः**

तिङर्थस्तु कृतिः। सैव भावना। सैव यत्नप्रयत्नादिशब्दैरभिधीयते। इयं च कृतिः क्रियाव्यापाराद्यपेक्षयान्यैव। तदुक्तं न्यायमञ्जर्यां जयन्तभट्टेन – **न क्रियामात्रं भावना। अपि तु परिदृश्यमानपूर्वापरीभूतयज्यादिभावस्वरूपातिरिक्तः पुरुषव्यापारः प्रत्ययात्प्रतीयमानो भावना।** यथाह –

**न सा केनचिदुत्पाद्या जनिका सा न कस्यचित्।**
**केवलं जननीह्येष जन्यस्य जनकस्य च।।**

क्रियाकारकादिविलक्षणैव सा शब्दात् प्रतीयत इत्यर्थः। पचति, पठति, गच्छतीत्यतो यथा पाकादिर्धात्वर्थः प्रतीयते तथा सर्वानुगतकर्तृव्यापारोऽपि। पचतीत्याख्यातपदस्य यदार्थो व्याचिख्यायासितो भवति तदा पाकं करोतीति पाकशब्देन द्वितीयान्तेन साध्यं धात्वर्थं व्याचक्षते कर्तृव्यापारात्मकं प्रत्ययार्थं करोतिपदेन। किञ्च किं करोति देवदत्त इति पृष्टाः सन्तो द्वये वक्तारो भवन्ति करोति पाकमिति, पचतीतिवत्तदिदमुभयरूपमपि उत्तरमेकार्थमन्यथा न तेन प्रष्टा प्रत्याय्येत। तस्मात् पाकं करोतीति पदद्वयस्य योऽर्थ स एवार्थः एकस्य पचतीति पदस्य। अत्रापि पचत्यर्थादन्यः करोत्यर्थः प्रतीयत एव। योऽसावन्यः करोत्यर्थः सा भावना इति।

SRI CHANDRASEKHARENDRA SARASWATHI VISWA MAHAVIDYALAYA KANCHEEPURAM SCSVMV

**कर्तृकर्मणोराख्यातार्थत्वनिरासः**

कर्तृकर्मणी नाख्यातार्थः। आख्यातार्थकृतेः प्रथमान्ते अन्वयेन प्रथमान्तपदादेव तदुस्थितेः। नाप्याख्याताभिहितसंख्यायाः कर्तरि अनन्वयप्रसङ्गः। आख्याताभिहितभावनायाः यत्रान्वयस्तत्रैव तदुपात्तसंख्यायापि अन्वयोपपत्तेः। समानप्रत्ययोपात्तत्वात्। तदुक्तमाचार्यैः कुसुमाञ्जल्याम् – **सङ्ख्यापि तावदियं भावनानुगामिनी, यं यं भावनान्वेति तं तं सङ्ख्यापि इति स्थितेः, एकप्रत्ययवाच्यत्वनियमात्। भावना च शुद्धं प्रातिपदिकार्थमात्रमाकाङ्क्षति। न हि व्यापारवन्तं व्यापार आश्रीयते, आत्माश्रयत्वात्। समवायं प्रति तदनुपयोगात्। विजातीयव्यापारवतोऽकर्तृत्वाच्च। न च द्वितीयाद्याः प्रातिपदिकविभक्तयः। ततः प्रथमानिर्दिष्टेनैव भावनान्वीयत इति तस्यान्वययोग्यतानियमात् सङ्ख्यापि तदनुगामिनी तेनैवान्वीयत इति नातिप्रसङ्गः** – इति।

नव्यास्तु भावनान्वयिन्येव सङ्ख्यान्वय इत्ययुक्तम्। न पचतीत्यत्र भावनानन्वयिन्येव कर्तरि तदन्वयेन व्यभिचारात्। तस्मात् प्रथमान्तपदोपस्थाप्य एव तदन्वयः। प्रथमान्तपदोपस्थाप्यत्वमेव हि तन्नियामकम्। किञ्चैवं सति विशेष्यतासम्बन्धेनाख्यातार्थसंख्याप्रकारकबोधं प्रति इतराविशेषणीभूतप्रथमान्तपद- जन्योपस्थितिः विषयतया कारणमिति लघुभूतः कार्यकारणभावः फलितः। यथा च वैयाकरणैः आख्यातस्य एकत्र कर्तृवाचकत्वे अन्यत्र कर्मवाचकत्वे च शबादिकं द्योतकत्वेन स्वीक्रियते, तथास्माभिरपि तत् सङ्ख्यान्वये द्योतकत्वेन स्वीक्रियते।

**प्रथमान्तार्थमुख्यविशेष्यकः शाब्दबोधः**

यत्र च प्रथमान्तस्य विशेष्यसमर्पकमन्यत्पदं निपातपदं वा नास्ति तत्र सर्वत्र प्रथमान्तमुख्यविशेष्यक एव बोधः। यत्र च प्रथमान्तपदं न श्रूयते तत्र कृतिमुख्यविशेष्यक एव बोधः। यथा ओदनं पचती त्यादौ। भावाख्यातस्य तु साधुत्वार्थकतैव। एवञ्च आख्यातार्थकृतेः आश्रयतासम्बन्धेन प्रथमान्तार्थे अन्वयात् प्रथमान्तार्थमुख्यविशेष्यकः शाब्दबोधः फलितः। प्रथमान्तार्थमुख्यविशेष्यकशाब्दबोधे च किं विनिगमकमिति चेत् उक्तं हि पदवाक्यरत्नाकरे –

**प्रयाति पुरुषस्तस्य पादयोरभिवादय।**
**इत्यादौ प्रथमान्तार्थः प्राधान्यान्मृश्यते तदा।।**

**यदि तिङ्प्रथमान्तयोः प्रथमान्तस्य प्राधान्यं न स्यात् तदा प्रयाति पुरुष इत्यत्र पुरुषः तच्छब्देन न परामृश्येत। गुणीभूतार्थस्य तच्छब्देन परामर्शासम्भवात्। अन्यथा दशैते राजमातङ्गास्तस्यैवामी तुरङ्गमाः इत्यत्र राज्ञस्तच्छब्देन परामर्शप्रसङ्गात्** – इति।

किञ्च सकलकारकप्रयोक्तुः क्रियाकर्तुः सर्वापेक्षया प्राधान्यमानुभविकम्। **तदधीते तद्वेद** इति पाणिनिसूत्रमप्यत्रानुकूलम्। सूत्रादस्मात् वैयाकरणपदनिष्पत्तिर्भवति। सूत्रे अधीते इत्यादिपदस्य अध्ययनादिधात्वर्थप्राधान्ये वैयाकरणपदस्य व्याकरणाध्ययनम्, तद्वेदनमिति वा अर्थः स्यात्। न तु पुरुषपरता। यदा तु अधीते इत्यस्य अध्ययनकर्तेति पुरुषप्राधान्यम्, तदैव विवक्षितार्थलाभः। अपि च पाणिनिः **प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा** इति सूत्रेण प्रथमायाः प्रातिपदिकार्थस्यैव स्वार्थत्वोक्त्या कर्मकारकादिस्थल इव कर्तृकारकद्वारा क्रियान्वयं नेच्छतीति ज्ञायते। अतो धात्वर्थः भावनाद्वारा प्रथमान्तविशेषणमेव।

न चैवं भावप्रधानमाख्यातमिति निरुक्तस्मृतिविरोधः। आख्यातार्थेषु सङ्ख्याकालकृतिषु भावनाख्यकृतेः प्राधान्यबोधकत्वात्तस्याः। तदुक्तं गोकुलनाथेन –

**भावप्रधानमाख्यातमिति निर्वचनस्मृतेः।**
**आख्यातार्थेषु भावस्य प्राधान्यमनुशिष्यते।।**

न च आचार्यकल्पाः इतिवत् पचन्तिकल्पाः इति प्रयोगप्रसङ्गः। प्रधानप्रकृत्यर्थस्य ईषदसमाप्तपाककर्तुः सङ्ख्यान्वययोग्यतया तिङुपात्ताया इव सुबुपात्ताया अपि बहुत्वसङ्ख्यायाः

अन्वयासम्भव इति वाच्यम्। कर्तुराख्यातार्थत्ववादिनामेवैतद्दोषापत्तेः। धातूपात्तभावना यथा न सङ्ख्यान्वयमर्हति तथा तिङुपात्तापीति तत्रैकवचनस्य साधुत्वार्थकत्वात्।

एवञ्च प्रथमान्तमुख्यविशेष्यकशाब्दबोधस्य सिद्धत्वात् **आख्यातार्थभावना-प्रकारकबोधं प्रति इतराविशेषणीभूतप्रथमान्तजन्योपस्थितिः कारणम्** इति कार्यकारणभावः फलितः। **चन्द्र इव मुखं दृश्यते** इत्यादौ सादृश्यविशेषणे चन्द्रे भावनान्वयवारणाय **इतराविशेषणीभूत** इति विशेषणं **पाकानुकूलवर्तमानयत्नवान्** इति तावदुक्तं भवति **पचति** इति।

**शाब्दबोधः**

शाब्दबोधप्रकारश्च – देवदत्तस्तण्डुलं पचति इति वाक्ये देवदत्तपदात् देवदत्तस्य, तण्डुलपदात् तण्डुलस्य, द्वितीयया कर्मत्वस्य, धातुना अधिश्रयणादेः व्यापारस्य, लकारेण कृतेः, एकवचनेनैकत्वादेश्च उपस्थितिः। अनन्तरं तण्डुलस्य द्वितीयार्थकर्मत्वे आधाराधेयभावसम्बन्धेन, कर्मत्वस्य जनकत्वसंसर्गेण अधिश्रयणादिव्यापारे तस्य चानुकूलत्वसंसर्गेण आख्यातार्थकृतौ, तस्याः कृतेः एकत्वस्य च समवायसम्बन्धेन देवदत्ते अन्वयः। एवञ्च तण्डुलवृत्तिविक्लित्तिजनकाधिश्रयणादिव्यापारानुकूलकृतिमान् देवदत्त एक इत्याकारकोऽन्वयबोधः।

देवदत्तेन तण्डुलः पच्यते इत्यादिकर्मलकारेऽपि देवदत्तादेः प्रातिपदिकार्थस्य तृतीयार्थकृतौ, तस्य जन्यतासम्बन्धेन पाके, तस्य च जन्यत्वसंसर्गेण आख्यातार्थफले, तस्य चाधारतासंसर्गेण प्रथमान्तपदोपस्थाप्येषु तण्डुलेष्वन्वयेन देवदत्ताश्रितकृतिजन्यपाकजन्यविक्लित्तिशालिनस्तण्डुलाः इति बोधः।

KANCHEEPURAM
SCSVMV

**मीमांसकमतरीत्या शाब्दबोधः**

चैत्रः ओदनं पचति इत्यत्र एककर्तृका सामानाधिकरण्यसम्बन्धेन एकत्वविशिष्टं यदोदनवृत्तिकर्मत्वं स्वनिरूपकानुकूलत्वसम्बन्धेन तद्विशिष्टा स्वनिष्ठकरणतानिरूप-कोदनोद्देश्यकत्वसम्बन्धेन पाकविशिष्टा, सामानधिकरण्येन एकत्ववती, वर्तमानकालिकाभावनेति बोधः।

चैत्रेण ओदनः पच्यते इत्यत्र सामानाधिकरण्यसम्बन्धेन एकत्वविशिष्टं यत् चैत्रवृत्तिकर्तृत्वम्, स्वनिरूपकानुकूलत्वम्बन्धेन तद्विशिष्टा, एकत्वविशिष्टं यदोदनवृत्तिकर्मत्वं स्वनिरूपितपाकानुकूलत्वसम्बन्धेन तद्विशिष्टा, स्वनिष्ठकारणतानिरूप-कौदनोद्देश्यकत्वसम्बन्धेन पाकविशिष्टा, स्वाश्रयौदनवृत्तिविक्लित्तिजनकपाकानुकूलत्व-सम्बन्धेन एकत्वविशिष्टा वर्तमानकालिका भावनेति बोधः।

**शाब्दिकमतरीत्या शाब्दबोधः**

चैत्रस्तण्डुलं पचति इति वाक्यात् तण्डुलाभिन्नाश्रयवृत्तिविक्लित्तिजनको वर्तमानकालिकः एकत्वविशिष्टचैत्राभिन्नाश्रयवृत्तिः व्यापार इति रीत्या बोधः। चैत्रेण तण्डुलः पच्यते इत्यादितस्तु एकत्वविशिष्टतण्डुलाभिन्नाश्रयवृत्तिविक्लित्तिजनको वर्तमानकालिकः एकत्वविशिष्टचैत्राभिन्नाश्रयवृत्तिः व्यापार इति बोधः। शप्श्नमादिसमभिव्याहृततिङः कर्तृबोधकत्वम्। सकर्मकधातुसमभिव्याहृतभावसाधारणविधिविधेयचिण्यगादिसमभिव्या-हृततिङः कर्मबोधकत्वम्। अतो न एककालावच्छेदेन कर्तृकर्मणोरुभयोः बोधापत्तिरिति विवेकः।

************************

SRI CHANDRASEKHARENDRA SARASWATHI VISWA MAHAVIDYALAYA
KANCHEEPURAM
SCSVMV